त्वमित्यर्थः स्मृतिमात्रे संस्कारसंबंधेनानुभवस्य हेतुत्वात् तल्लक्षणसमन्वयः प्रत्यभिज्ञायां संस्कारस्यैव का
रणत्वं न तत्र द्वारानुभवस्य तथा सति इंद्रियवदनुभवस्यापि प्रत्यक्षप्रमाणत्वापत्तेः अतः प्रत्यभिज्ञा
यां नातिव्याप्तिः मूलस्य ज्ञानपदमपि ज्ञातेच्छाकारणत्वघटितस्य लक्षणत्वलाभाय न त्वस्यापि
लक्षणत्वघटकतासमर्थत्वात् संस्कारध्वंसेऽतिप्रसक्तेश्च इदमुपलक्षणं निरुक्तकार्यता
वच्छेदकतया स्मृतिपदशक्यतावच्छेदकतया वासिद्धस्मृतित्वजातिमत्वं स्मृतिलक्षणमित्यपि
बोध्यम् अनुभवलक्षणमाह तद्भिन्नमिति स्मृतिभिन्नमित्यर्थः इदं स्मृतावतिव्याप्तिवारणाय घटा
दावतिव्याप्तिवारणाय विशेष्यभागः इदमुपलक्षणं संस्कारत्वावच्छिन्ननिरूपितकारणत्वं तादृश
कारणतावच्छेदकतया अनुभवपदशक्यतावच्छेदकतया वासिद्धानुभवत्वजातिमत्वं वानुभव
लक्षणमित्यपि बोध्यं अनुभवं विभजते सा च द्विविधेति अनुभवः प्रकारद्वयान्यतरविशिष्ट इ
त्यर्थः यथार्थोऽयथार्थश्चेति अत्र सकलप्रमानिष्ठयथार्थत्वं भगवत्ज्ञानवृत्तिविषयिता
वत्वे सत्यनुभवत्वं ज्ञानभेदेन विषयिताभेदानभ्युपगमात् सकलभ्रमनिष्ठायथार्थत्वं च भ
गवत्ज्ञानावृत्तिज्ञानवृत्तिविषयितावत्वं ताभ्यामेवानुभवसामान्यलक्षणस्य द्वैविध्यं

वक्ष्यमाणं तु तत्तद्धर्मप्रकारकानुभवस्य हेतुविषयपरामर्शेति ध्येयं प्रमाविशेषलक्षणमाह तद्वतीति प्रक
रतावच्छेदकसंबंधेन तत्संबंधिनीत्यर्थः तेन शुक्त्यादेरपि कालिकसंबंधेन रजतत्ववत्त्वेपि शुक्
त्यादिविशेष्यकरजतत्वप्रकारकभ्रमे नातिव्याप्तिः न वा तादात्म्यस्याधेयतानियामकतया
घटोवर्तिविशेष्यकरजतादिप्रमायामव्याप्तिः स्वप्रकारो विशेष्यतानिरूपकत्वं तस्यानुभवे
त्वर्थः तत्प्रकारकोभिमतितत्संबंधावच्छिन्नतन्निष्ठप्रकारताकमित्यर्थः न चेदं लक्षणं गुं
जासमुदाये वह्नित्वप्रकारके वह्नौ च गुंजासमुदायत्वप्रकारके चायं वह्निरयं गुंजासमुदा
य इति समूहालंबनात्मकविपरीतभ्रमेऽतिव्याप्तिः तस्य वह्न्यादिविशेष्यकत्वाद्वह्नित्वा

त्वा

दिप्रकारकत्वेति वाच्यम् तेन संबंधेन तत्संबंधिनिष्ठविशेष्यतानिरूपिततत्संबंधाव
च्छिन्नतन्निष्ठप्रकारताकत्वस्य विवक्षितत्वात् प्रकृते वह्नित्वनिष्ठप्रकारतायां वह्नि
निष्ठविशेष्यतानिरूपितत्वाभावात् गुंजासमुदायत्वनिष्ठप्रकारतायां गुंजासमुदायनि
ष्ठविशेष्यतानिरूपितत्वाभावाच्च नोक्तातिव्याप्तिः ननु घटे घटपटोभयं घट इति भ्र

मारभ्येति भेर्य्यादिदेशावच्छेदेन जायमानध्वनिमारभ्येत्यर्थः आदिनामृदंगादिपरिग्रहः आद्यध्वनिं वि
हायेति यावत् भेर्य्यवच्छेदेन जायमानध्वनेरुत्पत्त्यादित्याशयः श्रोत्रदेशपर्य्यन्तमिति श्रोत्रदेशाव
च्छेदेन जायमानध्वनिपर्य्यन्तमित्यर्थः अन्त्यध्वनिपर्य्यन्तमिति यावत् । द्वितीयादिशब्दा इति द्विती
यध्वनिप्रभृति चरमध्वनिपर्य्यन्ता ध्वन्यात्मकशब्दा इत्यर्थः येन इति शेषः शब्दजा इति ध्वन्यात्म
कशब्दासमवायिकारणका इत्यर्थः इदमुपलक्षणं वर्णो द्विविधः संयोगजो वर्णजश्च आद्यस्ता
ल्वोष्ठपुटसंयोगनिमित्तकारणकः तस्य ताल्वाकाशसंयोगासमवायिकारणकत्वात् द्वितीय
वर्णप्रभृति अन्तिमवर्णपर्य्यन्ताः सर्वे वर्णा वर्णासमवायिकारणका इत्यपि बोध्यं अत्र ध्वन्यात्मक
वर्णात्मकसर्वशब्दोप्यनित्यः अव्याप्यवृत्तिः अन्त्यभिन्नः कार्य्यशब्दनाश्यः अन्त्यशब्दउपां
त्यशब्दनाशनाश्यः शब्दो नास्तीति प्रकारं स्वयमेव वक्ष्यतीति बोध्यं बुद्धिलक्षणमाह मूले सर्वव्यव
हारहेतुरिति सर्वसामान्यहेतुरित्यर्थः वाच्यतासंबंधेन स्वानुकूलकृतिमत्त्वसंबंधेन वाव्यव
हारं प्रति विशेष्यतासंबंधेन समवायसंबंधेन वा ज्ञानस्य हेतुत्वात् लक्षणसंगतिरिति भावः नच

न॰प्र॰

११४

याऽदृशज्ञानव्यक्त्या व्यवहृतेनोत्पन्नः तज्ज्ञानव्यक्तीतिवाच्यं वाच्यतादिसंबंधावच्छिन्नव्यवहारनिष्ठ
कार्य्यतानिरूपितविशेष्यतादिसंबंधावच्छिन्नज्ञाननिष्ठकारणतासमानाधिकरणनिरूप्यावृत्तिजा
तिमत्त्वस्यविवक्षितत्वान्नोक्तदोषइति इतोपिलघुलक्षणमाह ज्ञानमितीति निरूक्तकारणताव
च्छेदकतया ज्ञानपदशक्यतावच्छेदकतयावासिद्ध ज्ञानत्वजातिमत्त्वं वुद्धिलक्षणमित्यर्थः
उक्तार्थएव मूलकाराभिप्रायः अन्यथा पर्य्यायपदद्वयवैयर्थ्यापत्तेः दीपिकाकारोक्तलक्ष्य
ज्ञानपदस्य वुद्धिलक्षणपरत्वमाह दीपिकायां जानामीत्यादिना घटमहं जानामीत्याद्यनुव्यव
सायगम्यमित्यर्थः विषयानिर्म्मोकेन केवलज्ञानानुव्यवसायस्यालीकतयापपाश्रुतासंग
तेः अत्र निर्विकल्पकस्य भगवत्ज्ञानस्य वा तादृशानुव्यवसायाविषयतया निरूक्तानु
व्यवसायसिद्ध ज्ञानत्वजातेः सकलज्ञानसाधारण्यं दुर्घटमिति केषांचित्तदूषणमपाकर्त्तुं
प्रकारांतरेण ज्ञानत्वजातिसाधनं करोति ध्येयं मूले वुद्धिर्विभजते सादिविधेति स्मृते
र्लक्षणमाह संस्कारजन्यं ज्ञानमितीति संस्कारसंबंधावच्छिन्नकारणतानिरूपितकार्य

कार्य्यकारणभावग्रहाव
गमनाविरहप्रयुक्तका
स्मात् ल्लतानां हेतुत्वा
द्रौ सत्वत्वे हेतुत्वं
भाति जलमात्रस्य तीर
गीकारः आवश्यकः
न तैलांतर्वर्त्तिजल
त्तिः जलस्यदाहप्रति
मति कूलत्वांगीकार
रूप लौहवज्जलस्य
प्रतिबंधकत्वमंग

लत्वरूपप्रकारद्वयान्यतरविशिष्टस्य पौर्व्वापर्य्यधर्मत्वे पि विति
वर्णत्वं च ताल्वोष्ठपुटजन्यतावच्छेदकतापि न हेतुत्वसंभवः त
ध्वन्यात्मक इति भेर्य्यादाविति आदिर्नाविच्छिन्नवत्वंतरासि
र्द्धः ताल्वोष्ठपुटसंयोगजन्यशब्दोऽपि प्राचामाशय इति प्रति
इति संस्कृतभाषादिरूप इत्यादिना अवः ननु [illegible] अंशे तां
वर्णत्वरूप इति यावत् न च ताल्वादिभावानुपपत्तिरिति चे
ताल्वाद्यवच्छेदत्वात् मूलकारस्य लसत्वेततो दाहानुत्प
[illegible] इति ध्वन्यात्मकशब्दा नांतर्वर्त्तिजलस्यैवत
न विभागंस्यत्वाभावादसांगत्यापत्तेः अंशे वानुभवबलात
साधुसंगच्छते अत्र संयोगजत्वं विभागजत्वे न इति
भिभेदे न भिन्नतया अनुगमकरू

47

कार्य्यकारणभावग्रहापत्तेश्च न गुरुत्वादिना हेतुत्वे शीतत्वसांसिद्धिकत्वयोर्व्याप्यधर्मत्वेपि विनि
गमनाविरहप्रयुक्तकार्य्यकारणभावग्रहापत्तितादवस्थ्यादेव शीतत्वादिनापि न हेतुत्वसंभवः त
स्मात् स्नेहानां हेतुत्वासंभवात् चूर्णादिपिंडीभावहेतुतया जले लघुधर्मावच्छिन्नवत्त्वं तत्रासि
द्धौ स एव स्नेह इत्युच्यते अतएव स्नेहोऽम्भस्येवेति भाष्यमपि संगच्छत इति प्राचामाशय इति प्रति
भाति जलमात्रवृत्तीति जलभिन्ने स्नेहव्यवस्थापकप्रमाणाभावादिति भावः ननु घार्द्यां स्नेहां
गीकार आवश्यकः अन्यथा तैलसंयुक्तचूर्णादावनुभूयमानपिंडीभावानुपपत्तिरिति चे
न्न तैलांतर्वर्तिजलसमवेतस्नेहादेव पिंडीभावोपपत्तेः न च तैले जलसत्त्वे ततो दाहानुत्प
त्तिः जलस्य दहनप्रतिकूलत्वात् इति वाच्यं अन्वयव्यतिरेकाभ्यां तैलानंतर्वर्तिजलस्येव त
त्प्रतिकूलत्वांगीकारात् प्रांचस्तु तैलांतर्वर्तिजलसमवेतस्नेहस्य प्रकृष्टत्वस्वीकारेण प्र
कृष्टस्नेहवज्जलस्य दहनानुकूलत्वमेव अप्रकृष्टस्नेहवज्जलस्यैवानुभवबलात्
प्रतिबंधकत्वमंगीक्रियत इत्याहुः जलमात्रवृत्तिरित्युपलक्षणं स्नेहो नित्य इति नि

न॰प्र॰

११३

46

पितध्वनिनिष्ठकार्य्यतावच्छेदकत
निष्ठासमवायिकारणतानिरूपित
षः एवं शब्दजत्वमपि ध्वनिनिष्ठा
कतया सिद्धत्वाद्दशजातिविशेषः
संयोगजध्वनीत्यर्थः भेरीदंडसंयो
गः इति शेषः तत्राद्य इति पूर्वेण न्व
दि तिभावः द्वितीय इति विभागज
त्यर्थः इदं च दलक्रियाजनकसा
तिभावः दलद्वयविभागजन्य इति
त्यर्थः यः सः इति शेषः तस्यापि ति
मवायिकारणकत्वादिति भाव

जन्याह
मिति

स्याहरणे कंकणादीनामन्यत्र करणीयत्वं प्रसिद्धमिति नोपपन्नत्वम् भवति ना भावना
रूपान्यत्र कृतिरारोपितमिति लक्षणानुगतिः विषमं वर्ण्यते यत्र घटनाननुरूप-
योः क्वेयं शिरीषमृदुगी क्व तावन्मदनज्वरः अत्रातिमृदुत्वेनातिदुःसहत्वेन चाननु-
रूपयोरंगनामदनज्वरयोर्घटना यथा वा अभिलषति यदीन्दो वक्त्रलक्ष्मीमृगा-
क्ष्याः पुनरपि सकृदब्धौ मज्ज संक्षालयांकं सुविमलमथ बिंबं पारिजातप्रसूनैः
सुरभय वद नो चेत्त्वं क्व तस्यास्मुखं क्व पूर्वत्र वस्तुसती घटना अत्र चंद्रवदनल-
क्ष्म्याः कल्पिता घटनेति भेदः विरूपकार्यस्योत्पत्तिरपरं विषमं मतं कीर्तिप्र-
सूतिधवलं श्यामा तव कृपाणिका अत्र कारणगुणप्रक्रमं हृद्यात् श्यामात् ति
धवलोत्पत्तिः कार्यकारणयोर्निवर्त्यनिवर्तकत्वेन पंचमी विभावना लक्ष-
तु णागणशालित्वेप्ययं विषम इति भेदः अनिष्टस्याप्यवाप्तिश्च तदिष्टार्थसमुद्य-

न.प्र.

११२ स्यः नित्य इति अनित्यः कारणगुणपूर्वकः आश्रयनाशनाश्यस्त्वस्यापि बोध्यं यथाश्रुते त्वेकल-
शघटकदलद्वयप्रयोजनमाह दीपिकायां कालादावित्यादिना एवमुत्तरत्रापि फले
शब्दलक्षणमाह श्रोत्रग्राह्य इति श्रोत्रकारणकज्ञाननिरूपितलौकिकविषयताशालित्व ता
र्थः अत्र ज्ञानस्य श्रोत्रेन्द्रियकारणकज्ञानत्वेन गौरवात् प्रयोजनाभावाच्च किं तु श्रावणत्वे-
नेति बोध्यं श्रावणोपनीतरूपादेर्विषयतया तत्रातिव्याप्तिवारणाय विषयतायां
लौकिकत्वविशेषणं न च भेर्यवच्छेदेन जायमानशब्दस्य श्रोत्रदेशावच्छेदेनानुत्प-
त्त्या निरुक्तश्रोत्रग्राह्यत्वाभावात् तत्राव्याप्तिरिति वाच्यं श्रावणनिरूपितलौकिकविष-
यत्वसमनाधिकरणरूपावृत्तिजातिमत्त्वस्य विवक्षितत्वात् इदमुपलक्षणं शब्दपद-
शक्यतावच्छेदकतया सिद्धशब्दत्वजातिमत्त्वमित्यपि बोध्यं तस्याश्रयमाह आकाश-
मात्रवृत्तीति वीप्यां कोलाहलो वने कोलाहल इत्यादिप्रतीतेरवच्छेदकतासंबंधे-
न वीपीवनविषयकत्वेनोपपत्तेः इत्याशयः शब्दं विभजते स द्विविध इति ध्वनित्व व-

कुं
३६

मात्त भक्ष्यप्राप्ताहि मंजूषां दृष्ट्वा भुक्त्वेन भवति : इच्छार्थमुद्दिश्य किंचित्कर्मारब्ध
वतस्तत्तेन केवलमिष्टस्यानवाप्तिः किंतु नतत एवानिष्टस्यापि प्रतिलंभ एवेतत्त
दपि वैविध्यं यो भक्ष्यप्रेप्सया सर्पपेटिकां दृष्ट्वा प्रविष्टस्य मूषकस्य न केवलं
भक्ष्यालाभः किंतु स्वरूपहानिरपीति यथा वा गोपाल इति कुरसत्वं प्रचुरत्वेर
वोढया प्रीतो मातृत्वेन नत्तौ भयपालयंत्ययाकृतम इदमर्था वाप्ति रूपेच्छार्थ
समुद्यमादिष्टानवाप्तावनिष्टप्रतिलंभे वोदाहरणम् अनर्थपरिहाररूपेच्छार्थ
समुद्यमात्तदुभयम् यथा दिवि प्रीतवतश्चंद्रं दुःसैंहिकेयभयाकुलि शशस्य यस्य
तन्विंगि साम्राज्यस्य ततो भयम् अत्र न केवलं शशस्यानर्थपरिहाणेनवाप्तिः
किंतु त्वाश्रयस्याप्यनर्थावाप्तिरिति दर्शितम् यत्तनिष्टावाप्तिरूपेच्छार्थसमुद्य
मात्तदुभयं यथा दिधक्षन्मारुतेर्वालं तमादीप्य दूषणानन : आत्मीयस्य पुरस्यैव

५०
राम
३२

कु.
6.

52.

लंकारः सा हरति अत्र श्लोके तावत्किमावयोः संकेतस्थाने भविष्यतीति प्रश्नेना
र्थं सूचयति कं प्रत्येतदभिहितमिति चेदध्यापकं प्रति सा कृतमुक्तमिति सूच्योलं
कारो यत्नोत्र बलाकाया असंचालतयात्र प्रतिबिंबितशुक्तिसंपन्नयातस्यानिश्चलत्वेनस्था
पवस्थितत्वेन तस्य निर्जनत्वं तेन तदेवावयोः संकेतस्थानमिति किमुकं प्रति सूचनं
चल स्पते नर्दन्न ध्वनिराशंकनीया दूरे व्यज्यमानस्यापि संकेतस्थानप्रश्नोत्त
रस्य स्वोक्तौ वाविष्कृतत्वात् एवं विहितालंकारेप्युदाहर्तव्यम् इदं चान्य
दत्तावधेयम यत्रालौकिकहीपांकेनापि विशुद्धरूढा नरसनू विहितत्वात्तज्जो नतु
दाहरणे वुभावेन स्वोत्याविष्कृतः किं तु वस्तु सौंदर्यबलादृहु कुवेद्वावि
शेषविशेषविनाति गम्यः तत्र वस्तुनालंकारस्य ध्वनिभावः स्यादत्वात्स्वचीनैः
स्वोक्त्याविष्कारोपि सत्यलंकारोदाहृतालीत्युदाहृतत्वात् अत्र स्वामिरप्युदाहृता

53

भतिपादयति भवतिहीति द्रव्यत्वव्यापकतावच्छेदकस्येत्यस्य फलमाह द्रव्यत्वमिति जातिपद
स्य कृत्यमाह द्रव्यत्वमिति सत्तारूपजातिमादाय द्रव्यादावतिव्याप्तिवारणाय सत्ताभिन्नेति त
थापि सामान्यवत्वे सतीति सत्यन्तस्य विशेष्यस्य च फलमाह ज्ञानत्वादिनेति तत्रैव गुणे ना
दावतिव्याप्तिरिति आदिना कालादिपरिग्रहः यथाश्रुते चैतत्सामान्यवत्वे सति कर्मान्यत्वे सति
कर्मेव द्वृत्तिपदार्थविभाजकोपाधिमत्वेऽतिव्याप्तेरभावात् इति गुणकर्मान्यत्वनिरूपणम् वेगे
नास्तीति स्थापकोऽप्युपलक्षणीय इति भावः वेगपदस्य भावान्यत्वसंस्कारपरत्वादीति भावः इद
मुपलक्षणम् वेगस्थेत्यत्र चकारेणानुक्तसमुच्चायकेन गुरुत्वस्यापि संग्रहात् ननु मूर्तगु
णत्वं मूर्तत्वं इति गुणत्वं संख्यादावतिव्याप्तमत आह अमूर्तेष्विति तथा चामूर्तावृत्तिगुण
त्वं प्रदर्शितं मूर्तगुणानां लाघवेनेत्यर्थः न चैतदपि मूर्तमात्रवृत्तिसंख्यादावतिव्या
प्तमिति वाच्यम् अमूर्तगुणावृत्तिसंस्कारत्वान्यगुणत्वव्याप्यजातिमत्त्वगुणत्वस्य मूर्तत्वव्या
प्यतावच्छेदकगुणवृत्तिजातिमत्वस्य वा विवक्षितत्वात् अत्र च द्वे शून्यान्तेन संख्यादे
[illegible] इति द्वितीये [illegible] च्छेदकां
वः इति चेदिदानीमिति भावः ननु रूपत्वस्य सत्तायां वा गुणनिष्ठकारणतावच्छेदकत्वं स्यादित्याशंक्याह
नादीति रूपत्वादीत्यादिना रसत्वादिपरिग्रहः यद्यपि गुणत्वजातौ प्रत्यक्षमेव प्रमाणं रूपादिषु संयुक्त
समवेतसमवायेन गुणत्वप्रत्यक्षसम्भवात् तथाप्यतीन्द्रियरूपादौ तत्प्रत्यक्षासम्भवेन तत्साधारणं
गुणत्वस्य तत्र प्रत्यनुमानं प्रदर्शितम् न च रूपत्वादिना सांकर्यमियातीन्द्रियरूपादौ गुणत्वासिद्धिः गुरुत्वा
दौ धर्मिग्राहकमानेन तत्सिद्धिरित्यनुमानप्रदर्शनमव्यर्थमिति वाच्यम् रूपादावव्याप्यासाधारण
गुण इति प्रत्यक्षस्यासिद्धेः इदमत्र बोध्यम् सकलगुणसाधारण्येका कारणता नास्त्येवेति कथं तदव
च्छेदकतया गुणत्वसिद्धिः न च चतुर्विंशतिगुणेषु प्रत्येकं याः कारणतास्तासामेव पक्षत्वतया तादृशस
कलकारणतावच्छेदकतया गुणत्वजातिसिद्धिरिति वाच्यम् तथा सति द्रव्यकर्मरूपभिन्नसामा
न्यवतिया कारणता साकिंचिद्धर्मावच्छिन्नेत्यनुमानेन रूपभिन्नत्रयोविंशतिगुणसाधारणवैजा
त्यस्यापि सिद्धिप्रसंगात् पारिमाण्डल्यस्य क्वाप्यकारणतया गुणत्वस्याप्यतिप्रसक्ततयाऽनवच्छेद
कत्वोऽप्यन्यत्र विस्तरः कर्मादावतिव्याप्तिरिति आदिना सामान्यपरिग्रहः लक्ष्ये लक्षणसत्वं

54

दि॰ गु॰ १

55

गम १

संख्याविशिष्टवाचकत्वमनेकपदस्येति न तत्राव्याप्तिरिति भावः स्वप्रतियोगिताकान्योन्याभावस
मानाधिकरणगुणत्वस्य विवक्षितत्वात् नाव्याप्तिरिति केचित् एकैकवृत्तय इति मूलस्य स्वसमाना
धिकरणान्योन्याभावप्रतियोगितानवच्छेदकैकत्वका इत्यर्थः यद्वा स्वाश्रयान्योन्याभावैक्याप्यकान्यो
न्याभावप्रतियोगिन इत्यर्थः स्वार्थे ठगिति विनयादिभ्यः स्वार्थे ठगभिधानान्नैकविशेषशब्दस्य तदन्त
र्गतत्वाद्विनयादेराकृतिगणत्वादिति भावः विशेषगुणा इत्यर्थ इति विशेषगुणत्वं चाभावनान्यो
न्यो वायुवृत्ति वृत्तिस्पर्शवृत्ति धर्मसमवायीतदन्यत्वे सति गुरुत्वाजलद्रवत्वान्यगुणत्व मत्रजात्या
दावति व्याप्तिव्यावर्त्तनाय विशेष्यं गुरुत्वनैमित्तिकद्रवत्वयोर्वारणाय गुरुत्वेत्यादि सांसिद्धिकद्रव
त्वसंग्रहाय जलेति संयोगादिवारणाय सत्यन्तं भावनायामव्याप्तिवारणाय धर्मान्तम् स
स्यत घटकसमवायीविशेषणं तत्तादिकमादायासंभववारणाय स्पर्शसंग्रहाय च स्पर्श
वृत्तीति संख्यादिषु स्वापरत्वमत्वस्येति व्युत्पत्त्या परिमाणपरत्वयोरेव ग्रहणमिति भवता
रणायादिपदं ग्राह्यगुणानुच्चैशीघ्र्यं दर्शयति संख्यापरिमाणेत्यादिना गुरुत्ववेगावे
[illegible] नेत्रादिप्रतिस्पर्शग्राहकस्पर्शग्रहः मेले

नाव्याप्तं मूर्त्तवृत्तिगुणत्वं ननु धर्मेत्यादिमूलेनैतेषाम् मूर्त्तवृत्तिगुणत्वं साधर्म्यमुक्तं तत्संख्या
दावतिव्याप्तमतश्चाह मूर्त्तेष्विति मूर्त्तावृत्तिगुणमेतेषां साधर्म्यमित्यर्थः न च तथाप्यमूर्त्तमा
प्रवृत्तिसंख्यादावतिव्याप्तिरिति वाच्यम् मूर्त्तगुणवृत्तिसंस्कारत्वान्यगुणत्वव्याप्यजातिमत्त्व
गुणत्वस्य मूर्त्तत्वाभावव्याप्यतावच्छेदकपरिमाणवृत्तिजातिमत्तस्य वा विवक्षितत्वात् व्याप्तेः
मूर्त्यां तेन संख्यारूपादिष्वुदासः सत्तामादायासंभववारणाय गुणत्वव्याप्येति कर्मण्यतिव्या
प्तिवारणाय विशेष्यीभूतगुणत्वस्य निवेशः द्वितीयेपरममहत्त्वजातिमादायातिव्याप्तिवारणाय
परिमाणवृत्तीति नन्वनुभयेषां गुणा इति मूलेन संख्यादिपंचानामनुभयवृत्तिगुणत्वं साध
र्म्यमुक्तं तच्च रूपादावतिव्याप्तमत उभयपदं मूर्त्तामूर्त्तपरतयाव्याचष्टे मूर्त्तामूर्त्तेति न च मूर्त्त
मात्रवृत्तिसंख्यादावतिव्याप्तमिति वाच्यम् कालवृत्तिवृत्तिगुणत्वव्याप्यजातिमत्त्वस्य इच्छात
त्वव्यापकतावच्छेदकगुणत्वव्याप्यजातिमत्त्वस्य वा विवक्षितत्वात् नन्वनेकाश्रितत्वं सं
योगादावव्याप्तमनेकपदस्य बहुत्वविशिष्टे शक्तत्वात् अत आह संयोगेति तथाचैकत्वभिन्न

तिव्यापकस्यवत्तीन्द्रियत्वं चत्वते ननु द्वीन्द्रियग्राह्यत्वं रूपादावतिव्याप्तं तेषां मनसापि ग्रहणात् बाह्येन्द्रियद्वय
ग्राह्यत्वमपि नैवातिव्याप्तं रूपादीनां चक्षुरादिना ग्रहणादतीन्द्रियसंख्यादावव्याप्तं च तत्र नेन्द्रिय
ग्राह्यत्वस्यैवाभावादत आह चक्षुर्ग्राह्यवृत्तीति चक्षुस्त्वगुभयग्रहणयोग्यत्वं तदर्थः चक्षुस्त्वगुभयग्रा
ह्यभावनावृत्त्यन्यधर्मसमवायित्वमिति निष्कर्षः संस्कारत्वादिकमादाय भावनायामतिव्याप्तिवा
रणाय भावनावृत्त्यन्येति कर्मादौ तद्वारणाय गुणत्वव्याप्येति विशेषः ननु वाय्वादौ कैकेन्द्रियग्राह्यत्वं सं
ख्यादावतिव्याप्तं तेषामुभयग्राह्यत्वे एकैकग्राह्यत्वेनानयायादव्याप्तं चातीन्द्रियरूपादौ तेषामिन्द्रिय
ग्राह्यत्वस्यैवाभावादत आह रूपादीनामिति चक्षुरादीति चक्षुरादिनैवेत्यर्थः तथा चैकैकमात्रग्रा
ह्यत्वस्य विवक्षितत्वात् संख्यादेर्नातिव्याप्तिः [illegible] तेन नातीन्द्रियरूपादावव्या
प्तिः [illegible] समवेतजातिमत्त्वमेकैकलक्षणमिति भावः
प्तिः तथा च चक्षुस्त्वगुभययोग्यात्वे बहिरिन्द्रियग्राह्यगुणसमवेत [illegible] परिमाणान्य
न च तत्तत्तेरेणातिव्यापकत्वं चक्षुरिन्द्रियेणैव ग्रहणात् [illegible] भावना [illegible] संस्कार
[illegible] विशेषगुणवत्वात् [illegible] भावनेत्यत्र भावना [illegible] प्रतिपादित दा
[illegible] जातिमत्त्वगुणत्व [illegible] व्याप्यतावच्छेदकसंयोगवि
भागावच्छेदकं च [illegible] संख्यादौ सत्ताजातिलक्षणसमन्वयः अत्र नलोपक्ष
[illegible] शीतस्पर्शो वा पृथिवी [illegible] स्पर्शव्यावृत्तजातिविशेषेणानामा
वच्छेदकजात्यवच्छिन्नकार्यतावच्छेदकत्वाविभागेनादृशजात्यवच्छिन्न शब्दविशेषजनकता
चतेजोवेगातिशयेऽन्यताति संयोगनाश्यतावच्छेदकजात्यवच्छिन्न घटादिरिति द्वये
नावच्छेदकतत्तत्संख्यातिवारणायावृत्तित जातिविशेषणम् कर्मादौ तद्वारणाय विशे
ष्यं पृथिवीत्वादिव्याप्यतावच्छेदकतत्तत्संख्यात्वादिरूपस्य तत्र संख्यापरिमाणादव्या
तिवारणाय जातिपदं द्रव्यविभाजकतावच्छेदकोपाधेरव्यापकत्वं तच्च जातित्वेन तावि
वादीनां तेषां नन्वनादृशोपाधितेन अन्यथा संख्यात्वादेरपि तादृशजातित्वादसमवाय
तेरिति संख्यादिपरत्वान्नोरवत्वं स्नेहद्रवत्वेत्यत्र स्नेहपदं वेगस्याप्युपलक्षकं स्थि

त

59

महत्त्वं चादापातिव्याप्तिवारणाय गुणत्वसाक्षाद्व्याप्येति संस्कारत्वान्यगुणत्वव्याप्यव्याप्य
त्वे सति गुणत्वव्याप्यत्वं तदर्थः अन्यथा भावनात्वस्य गुणत्वसाक्षाद्व्याप्यत्वाभावाद्भावना
यामव्याप्तिप्रसंगात् इत्यमपि परत्वापरत्वयोरतिव्याप्तिरवशिष्यते सापि परत्वापरत्व
त्वत्वेन जाते विशेषणीयत्वान्निरसनीयेति ध्येयम् मूले तु कारणगुणोत्पन्ना इति का
रणगुणोत्पन्नत्वं च न पूर्वोक्तं स्वाश्रयसमवायिसमवेतगुणजन्यत्वं हस्तपुस्तकसंयो
गविभागादिजन्यकायपुस्तकसंयोगविभागादावतिव्याप्तेः न च स्वस्वाश्रयसमवायि
मात्रसमवेतगुणजन्यत्वं तत्र हस्तपुस्तकसंयोगादिस्तु न स्वाश्रयसमवायिमात्रसम
वेतेन इति वाच्यम् तथाप्यवयवावयविनोरेकत्वाभ्यां जनिते अवयवावयविद्वित्वादावति
व्याप्तेः स्वाश्रयसमवायिमात्रसमवेतत्वजातीयगुणजन्यत्वेन तत्र अवयवैक
[illegible] जातिव्याप्यभावात् न च संस्कारत्वेन
त्वेऽप्यादावतिव्याप्तिरिति वाच्यम् लौकिकसाक्षात्कारविषयगुणत्वन्यूनवृत्तिसंस्कारत्वान्यथ
मिसमवायव्यापकगुणत्वव्याप्यविवक्षितत्वात् सत्तादिकमादायातिव्याप्तिवारणाय गुणत्वन्यूनवृत्ति
तिभावनातिव्याप्तिनिरासाय कयोरव्याप्तिवारणाय संस्कारत्वान्येति ज्ञानादावतिव्याप्तिवारणाय हस्तत्वा

60

गु वत्वं कारणगुणेनेति समवायिकारणसमवेतगुणेनेत्यर्थः अत्र कारणत्वमपि वक्ष्यमाणं समवायित्वमा
त्रबोध्यम् तादृशा इति तथा च कारणगुणोत्पन्नाः कारणगुणोत्पन्नाः न कारणगुणोत्पन्ना अका
रणगुणोत्पन्ना इति विग्रहे स्वाश्रयसमवायिसमवेतगुणजन्यत्वं कारणगुणोत्पन्नत्वं तादृशगुण
जन्यत्वमकारणगुणपूर्वकत्वमिति भावः यद्यपीदं नित्यरूपे जन्येपि पाकजरूपादौ अवयवा
वयविनोर्द्वित्वद्विपृथक्त्वातिरिक्तद्विपृथक्त्वादौ कर्मजन्यसंयोगविभागयोर्वेगेषु पाकजद्रवत्वे चातिव्या
प्तं तथाप्यकारणगुणोत्पन्नमात्रवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वं विवक्षितमिति न दोषः अकार
णगुणोत्पन्नमात्रवृत्तित्वं च नित्यत्वकारणगुणोत्पन्नवृत्तित्वमपि रूपत्वनिष्ठपाकजन्यतावच्छेदक
वैजात्यसंयोगविभागवेगनिष्ठकर्मजन्यतावच्छेदकवैजात्यमणुपरिमाणनिष्ठवैजात्यं परम

...पपत्तेः इत्याशयः शब्दे विभजते साधि विधरति ध्वनि त्वव

त्वयोः साजात्यमस्तीति न दोषस्तादवस्थ्यम् गुणत्वव्याप्यव्याप्यजात्या साजात्यस्यावि
वक्षितत्वात् अवयवावयविरूपादीनां च नीलत्वादिना साजात्यसत्त्वान्नासम्भवः ननु न
पाधिनित्यरूपे संख्यावयवजन्यपरिमाणे कर्मजवेगे चाव्याप्तिरिति चेन्न स्वाश्रयस
मवायिमात्रसमवेतस्वसजातीयगुणजन्यवृत्तिजातिमत्त्वस्य विवक्षितत्वात् नित्य
रूपादौ च तादृशरूपत्वादिकमादाय लक्षणसमन्वयात् अत्र संख्यात्वपृथक्त्वाति
रिक्तैकैन भावनात्वत्यन्यत्वेन च तादृशजातिर्विशेषणीया तेन तादृशसंख्यात्वं पृथक्
त्वं चादाय द्वित्वद्विपृथक्त्वादौ नातिव्याप्तिः न वा अवयववेगजन्यावयविवेगवृत्ति
सत्तागुणत्वसंस्कारत्वमादाय भावनायामतिव्याप्तिः न चैवं जातिघटितलक्षणे
तादृशरूपत्वादिजातिमादाय पाकजरूपादौ वातिव्याप्तिरिति वाच्यम् तादृशजा
तिमत्त्वे सत्यपाकजत्वस्य विवक्षितत्वादिति सर्वं चतुरस्रम् लक्षणतावच्छेदके पा

स्यादित्तेन रूपादौ नातिव्याप्तिः इति सैषु गुणसाधर्म्यम् नीलत्वादीनां रक्तत्वादिपरिग्रहः अन्य
था नीलत्वादीनामेकव्यक्तित्वेन तु लाघवादेव नीलारुणादिव्यक्तौ ध्वंसेत्स्यतीत्यत आ
नष्टो ह लाघवं चेति प्रत्यक्षबाधितमिति नीलो रक्तो नुत्पन्न इत्यादिप्रत्यक्षबाधितमित्य
र्थः अन्यथेति लाघवमात्रेण नीलारुणादीनामैक्याभ्युपगम इत्यर्थः नन्वुत्पन्नो (
घटो विनष्टो घट इत्यादिप्रतीतेर्घटादेरैक्यमित्यत आह नन्वित्यादेति एतेन ईदृश
जातिसाधकप्रमाणेन रसादिके रसत्वादिकं आदिना गंधत्वादिपरिग्रहः संयोगादाव
तिव्याप्तिं परिशंकयाह चक्षुर्मात्रस्य सामिति चक्षुर्मात्रग्राह्यमित्यस्येत्यर्थः तेन चक्षुरितिसा
कधारणेपि न पौनरुक्त्यं विशेषगुणत्वमिति विलक्षणगुणमित्यर्थः वैलक्षण्यं च चक्षु
र्भिन्नग्राह्यत्वं न च तथापि प्रमामिति संयोगेऽतिव्याप्तिरिति वाच्यम् चक्षुर्मात्रग्राह्य
त्वस्य चक्षुर्मात्रग्राह्यजातिमद्गुणत्वविवक्षणस्यावश्यकत्वात्तेनैव प्रमामिति

62

स्यादित्तेन रूपादौ नातिव्याप्तिः इति संगुणत्वसाधर्म्यम् नीलत्वादीनां रक्तत्वादिपरिग्रहः अन्य
था नीलत्वादीनामेकव्यक्तित्वेन तु लाघवादेव नीलारूपत्वादिव्यक्तौ ध्वंसेत्यतीयत आ
ह लाघवं चेति प्रत्यक्षबाधितमिति नीलोरैको नुत्पन्न इत्यादि प्रत्यक्षबाधितमित्य
र्थः अन्यथेति लाघवमात्रेण नीलारूपत्वादीनामेकत्वाभ्युपगम इत्यर्थः ननूत्पन्नो (
घटो विनष्टो घट इत्यादिप्रतीतेर्घटादौरेकत्वमित्यत आह नुत्पादेत्येतेन ईदृश
जातिसाधकप्रमाणेन रसादिके रसत्वादिकं आदिना गंधत्वादिपरिग्रहः संयोगादाव
तिव्याप्तिपरिहारायाह वक्ष्यमाणमिति वक्ष्यमाणमित्यस्येत्यर्थः तेन च क्रियतिप्रा
कृधारणेपि न चानरूकं विशेषगुणत्वमिति विलक्षणगुणमित्यर्थः वेलक्षण्यं च वक्ष्य
मिन्नाग्राह्यत्वं न च तथापि प्रमाणमिति संयोगे ऽतिव्याप्तिरिति वाच्यम् वक्ष्यमाणं प्रमाणमिति
[illegible] जातिमत्त्वेन विवक्षणस्यावश्यकत्वात् तेनैव प्रमाणमिति

[illegible] न्यतरस्यात्याद नियमेनावयवेषु विभागसत्त्वक्रियात्वायेनारम्भकस
योगनाशादवयविनाशापत्तेः न चावयवेषु तेजोभिघातान्तरं यत्र मक्षणएवावयविनाशं
भवेन ततः पूर्वमवयविनिरूपादिनाशोत्पादाभ्युपगमे बाधकाभाव इति वाच्यम् तत्र पूर्वाव
यविनाशावयवान्तरोत्पादयोरावश्यकत्वात् पूर्वावयविनिरूपादिपरावृत्तिजनकविजाती
यतेजःसंयोगस्य मानाभावेनाकल्पनात् अवयविरूपनाशे आश्रयनाशस्य हेतुतान्तया
का जन्यत्वस्य कार्यत्वावच्छेदककोटिप्रवेशे गौरवादवयविनाशो विनापाकेनावयविरूपना
शासम्भवादवयविनीलादावयवनीलादेर्हेतुतायां व्यभिचारापत्त्या पाकेनावयविनी
लाद्युत्पादासम्भवाच्चिन्त्यमिति मानः अवयविष्वन्वेति घटारम्भककपालादिपरमा
णुपर्यन्तेष्वग्निसंयोगेन पूर्वोक्तरीत्या घटादिद्व्यणुकपर्यन्तनाशसंभवादिति भावः (
स्वतंत्रेषु कार्यद्रव्यध्वंसाविशिष्टेषु ननु तत्र सस्थानभेदादिकथं न प्रतीयत इत्यत आ

63

64

धुररसं प्रति स्वसमवायिसमवेतत्वसम्बन्धेन मधुररसत्वेन हेतुतायां त्र्यणुकगतमधुररसान्य
थानुपपत्त्या न्यूनतया तादृशकारणतावत्त्वात् त्र्यणुकादौ मधुरादिरसोत्पत्तेर्दुर्वारत्वात्
ननु घटावयवेष्यापातु पाकोऽनन्तपरमाणावेव तत्राह नहि रक्तोनीति इति रूपग्रन्थः नसंयोग
गत इति काचिन्न संयातीति स्तु कश्चिन्न स्पर्शीव दृष्टप्रतियोगिकत्वमवगाहत इति भावः रूपा
दीनां पाक इति रूपादीनां परावृत्तिरित्यर्थः पाकेन सम्भवतीति रूपादिपरावृत्तिफलक
स्तेजःसंयोगो न सम्भवतीत्यर्थः रूपादिपरावृत्तिर्न संभवतीति यावत् रूपादिनाशं प्रति मात्रा
बा न्यरं परासंघरणसर्वावयवावच्छेदेन तेजःसंयोगस्य हेतुत्वात् पाऽवयविनावच्छेदे स्वावयवेषु स
व स्तु स्वयवविनि रूपादिनाशानसम्भवति तस्थितोः सर्वावयवावच्छेदेन तेजःसंयोगस्याभावादि
तिभाव न चाविद्यमानेपि घटादौ सर्वावयवावच्छेदेन तेजःसंयोगः कुतो नोत्पद्यत इति वाच्य
इतया तत्यारम्भकसंयोगावच्छेदेनावयविनि तेजःसंयोगोत्पत्तिकाले तदवच्छेदे नावय

७

पेननी तादिकं प्रति स्वाश्रयसमवेतत्वसम्बन्धेन तालादेर्हेतुत्वस्य तद्वाय्यावश्यकत्वात्
न च वक्त्रमिति प्रतीति विषयतायाश्चानेकत्र कल्पने गौरवमेकत्र कल्पने लाघवमिति श्री
लाघवानुरोधेनातिरिक्त चित्रप्रतीतिघीयपूर्वोक्तजाति वध्यजातिवन्धकभावकल्पने नागौरवस्यत
दोषत्वं फलमुखत्वादित्यन्यत्र विस्तारः स्पर्शोऽपि व्याख्यात इति कोमलत्वकाठिन्य नस्पर्शवदवय
वाभ्यामारब्धे घटादौ स्पर्शानंगीकारे घटे स्पर्शनानापत्तिरित्यादिरीत्या चित्रस्पर्शोऽप्यवश्यका
इति भावः अवयविनो नारसत्वे पिज्ञात्वेरभावादिति न चाचित्रोरस इति प्रतीति विषयतया
ह तिरिक्तचित्ररससिद्धिरिति वाच्यम् तादृशप्रतीतेरेवावमवगतनानारसेरूपत्वेनरतिरि
क्तचित्ररसतत्प्रागभावध्वंसादिकल्पने गौरवात् नचैवं त्र्यणुकरस्यायोग्यतया मधुरादिरस
क प्रतीतिर्नियामकाभावात् सम्भवेनास्तु त्र्यणुके मधुरादिरसस्वारणुकात्त्यावयविपर्यन्तं मधुरादि
रसवत्त्वे नानाभावात् त्र्यणुकमधुररसेनैव मधुरादिप्रत्ययोपपत्तेरिति वाच्यम् समवायेन म

65

राम

७

त्तिस्वसमवायिसमवेतत्वसंबंधेननीलातिरिक्तरूपत्वेनपीतरूपंप्रतिपीतत्वातिरिक्त॰ ति

रूपत्वेनप्रतिबंधकत्वमितिरीत्याप्रतिबध्यप्रतिबंधकभावकल्पनाद्त्रयथा॰ 66

नानाजातीयकपालारब्धेघटेनीलकपालत्वाद्यवच्छेदेनपीतोत्पादापत्तेर्दुर्वारत्वा

३ दितिभावः अत्रनव्याः नानाजातीयरूपवत्कपालारब्धेघटेपीतकपालावच्छेदेननीला

पत्तिवारणायनरूपपूर्वोक्तः प्रतिबंध्यप्रतिबंधकभावः कल्प्यते किंत्ववच्छेदकता

सम्बंधेननीलादिकंप्रतिसमवायेननीलादेःकारणत्वंकल्प्यतेचित्ररूपांगीका

रेतुसमवायेननीलादिकंप्रति[illegible]समवेतत्वसम्बन्धेननीलत्वाद्यादिनाहेतु

त्वस्यपूर्वोक्तप्रतिबंध्यप्रतिबंधकभावस्यचकल्पनेगौरवमित्याहुः नन्वत्रावच्छेद

कतासम्बन्धघटितोक्तकार्यकारणभावांगीकारेप्यवच्छेदकतासम्बन्धेनकपा


लादौआपद्यमानस्यनीलादेःसमवायेनघटादाविवगगनादावप्युत्पत्तिवारणाय

ह तेजसामिति व्यूहः संस्थानं तद्देशाद्यं समुत्पत्तिश्च क्रिया द्व्यणुकनाशादिरूपा द्रष्टव्या तेन ।
णानिरूपणम् क्रियनश्चेति शेषः विभागजविभागस्वंगीकारश्चेति कारणाकारणविभा
गात्कार्याकार्यविभागवत् कारणमात्रविभागात्कारणाकारणविभागानंगीकार
इत्यर्थः इत्थमारम्भकसंयोगप्रतिद्वंद्विविभागजनकक्रियायास्तदनारम्भकसंयोग
प्रतिद्वंद्विविभागाजनकत्वनियमे मानाभावादिति भावः अत्र विभागजे ह्येव हस्तमा
णाविकसत्वकमलभङ्गस्थले अंशे योक्तनियमाङ्गीकार आवश्यकः एवं च अणुकार
म्भकसंयोगप्रतिद्वंद्विविभागजनकपरमाणुक्रियायास्तत्र अणुकारंभकसंयोगप्र
तिद्वंद्विविभागजनितस्तत्रत्यानन्तरपरमाणुक्रियया तत्परमाण्वाकाशादिसंयोगप्र
तिद्वंद्विविभागोत्पत्तिर्न सम्भवति न च मास्तु तत्र परमाण्वाकाशविभागः कादतिरि
ति वक्तव्यम् तथासति नाशकविभागाभावेन परमाण्वाकाशसंयोगस्य नित्यत्वापत्तेः

एवं चेवं. एवकाशसंयोगरूपस्य पूर्वदेशसंयोगस्य प्रतिबंधकस्य सत्त्वात्परमाणावुत्तरदेशसंयोगा-
नुत्पत्त्या परमाणुगतक्रियानाशानुपपत्तेः आ[illegible]स्तादृशपरमाण्वाकाशभावाजनकः परमा-
ण्वोर्विभागो वाच्यः इत्यभिप्रायवानाह तदङ्गीकारेत्यादि अनयोः पक्षयोः प्रथमपक्ष एव सम्यक्रूपेछि- द
देन कमलारम्भकसंयोगस्तदवष्टब्धदेना क्रियानुत्पत्त्या च न विकसत्कमलभंगप्रसंग इति ध्येयम्र
नत्वे विभागजनकत्वे कर्मत्वं कर्मलक्षणं स्यादिति व्याप्तेः संयोगविभागयोरनपेक्षं कारणं कर्मेति सू-
त्रस्य संयोगस्य विभागस्य वाऽनपेक्षं कारणं कर्मेति लक्षणं बोधतात्पर्यमित्यभिमानेन दिनीयल-
क्षणस्य तत्रातिव्याप्तिमभिधानमिदम् वस्तुतस्तु संयोगविभागयोरनपेक्षं कारणं कर्मेति सूत्रं तत्र
संयोगस्यानपेक्षं कारणमित्युक्तौ कारणाकारणसंयोगोऽतिव्याप्तिः तत्तस्य कार्याकार्यसंयोगे किं-
चिदनपेक्षत्वकारणत्वात् एवं विभागस्यानपेक्षकारणमित्युक्तौ कारणाकारणविभागेऽतिव्याप्ति-
रतउक्तं संयोगविभागयोरिति । अनपेक्षत्वम् च स्वोत्तरोत्पन्नभावानपेक्षत्वम् संख्याकर्मणो

पि संयोगजनने द्रव्यस्य पूर्वसंयोगनाशस्य चाक्षणोदसम्भवापत्तेः विभागासमवायि
कारणत्वे सति संयोगहेतुत्वं वा नतु पूर्वदेशविभागस्तु नोत्तरदेशसंयोगे का
रणं व्यवहाराभावेनोन्यथासिद्धेः संयोगस्य विभागं प्रति कारणत्वाभा
वादेव नासमवायिकारणत्वमिति नतत्रातिव्याप्तिः रूपं च कारणमात्र वि
भागस्य पूर्वसंयोगनाशं द्रव्यनाशं वानपेक्ष कारणाकारणविभागजन
कत्वेपि नातिव्याप्तिः तस्य विभागजनकत्वेपि संयोगविभागोभयजनकत्वा
भावादिति ध्येयम् द्रव्यारम्भकसंयोगविनाशाविशिष्टं कालमपेक्षतेति द्रव्या
रम्भकसंयोगनाशोत्पत्त्यधिकरणक्षणोत्तरक्षणमित्यर्थः कारणता
तु द्रव्यारंभकसंयोगनाशत्वेनैव लाघवादिति ध्येयम् एवमग्रेपि नवदशै
[illegible] दशक्षण क्रियाः क्रमेणोपपादयति तथाहीत्यादिना परमाणौ कर्म

[illegible] कर्म परमाण्वंतरेण द्व्यणु
कारंभकपरमाण्वंतरेण आरम्भकेति द्व्यणुकारंभकेत्यर्थः ततः परमा
णोः श्यामादिनाश इति परमाणुगतरूपनाशं प्रति द्व्यणुकात्मकद्रव्यस्य प्र
तिबंधकतया तत्पूर्वं श्यामनाशासंभवादिति भावः द्रव्यारंभकेति द्व्यणु
कारम्भकेत्यर्थः तद्विनाशमनन्तरेणेति द्व्यणुकनाशोत्पत्तिक्षणोत्पत्ति।
कोत्तरसंयोगनश्यमनाशक्षण एव पूर्वक्रियानाश इति भावः तस्मिन्न प
रमाणौ क्रियांतराभावादिति परमाणौ क्रियांतराभावादित्यर्थः अ।
त्र हेतुमाह कर्मवन्तीति गुणोत्पत्तिमनन्तरेण कर्मानुत्पत्तौ हेतुमाह।
निर्गुणेति कारणमात्रविभागस्य कारणाकारणविभागजनकत्वाभाव
पक्ष एवमस्मान्तरेऽप्युक्तक्षणे क्रियोक्ता सा च निर्गुणे द्रव्यारम्भानुरोधेन क्रि



१५

पतेर्निरुपाधिकृपानिधेः चंद्रालोको विजयते शरदागमसंभवः हृद्यः ८
कुवलयानंदो यत्प्रसादादभूदयम् इति श्रीमदद्वैतविद्याचार्यश्रीभरद्वा
जकुलजलधिकौस्तुभश्रीरंगराजाध्वरींद्रवरदसूनोरप्पय्यदीक्षितस्य कृतिः कुव
लयानंदः समाप्तः

73

कु
६८

केनकालमनसंविटं ज्ञात्वा विपक्षया हसन्नेर्पिताकूतं लीलापद्मनिमीलितं विहितं परव

तं तं ज्ञातुः साकूतचेष्टितं प्रियेण गृहागते प्रातः कांतातल्पम् [illegible] कल्पयत् रात्रौ स्वपतीग

हे जागरा(?) तेन श्रांतो सीतितल्पकल्पनाकूतम् प[illegible]वांक्रुस्पंदि स्वेदबिंदुप्रबंधै

ईष्यामिलितं कुंकुमं क्वापि कंठे पुंस्त्वं तल्पस्थं जयंती वैस्याक्षितापाणौ खडुले

खांकि लेख अत्र स्वेदानुमितं पुरुषायितम् पुरुषोचितखड्गलेखनेन प्रकाशि

तम् व्याजोक्तिरत्यत्र [illegible]पदाकास्य गोपनम् सा विपक्षगृहागमनयणो

एस्मि धूसरा अत्र चौर्यरतकृतसंकेतमप्यपलंठनेन लग्नधूलिजालस्य गो

पनम् [illegible]नभवेद्दोषः प्रियायाः सव्रणोऽधी समंगाय [illegible]सीर्वा

रितां रतिमयाधुना उत्पत्तिना खंडिताधर[illegible]पानापि कापाः सकाशमागतं

व

प

74

रभुक्तमित्यभिप्रायेणैव वर्तीति तीत्युक्तमिति सख्याक्तवचनं सखीवचनोद्घाटनार्थं
पुनरपि तदेव कथयति तिनायकस्याक्तेयः मत्तां तु कथयामि यावद्भवति तीति स्वा ३
मिप्रायोद्घाटनप्रकारेण तस्याः कुशलं भवति मदागमनसमये श्वासे संचरत्तु कथंतां २
मत्तां कथयेयमित्यभिप्रायः प्रश्नोत्तरं तदभिन्नमुत्तरं चित्रमुच्यते केदारयोर
णालैः केखेटाः किंचलं वपुः अत्र केदारयोः बलाणा[illegible]ला इति प्रश्नाभिन्नमुत्तरम
केखेटाः किंचलम इति प्रश्नद्वयस्य वपुरित्येकमुत्तरम उदाहरणांतराणि विद
ग्धमुखमंडने द्रष्टव्यानि सत्त्वं पराशयाभिरीतः साकूतचेष्टितम मविपक्ष्य
मिमाकेशैः सीमंतमणिमाहरणेन कामुकस्यावलोकनेन संकेतकालप्रश्नमा
बंधानवत्या श्रेष्ठेयम अस्तंगते सूर्ये संकेतकाल इत्याकूतम पद्मावद्यां सं

नामुक्त म पत्राणौ वेतसी यां यातत्रैयं सुताराम इति गरीत्संतानमार्गे पदं तं प्रति तं
कौमंप्रा नाया उत्त मिदं वे तसी कुंजे स्वां हं यामित्याकूतम् मानेस्मिन्नर्ल प्रा
येन किंचित्सांय विपते पयोधौ नैरच्छाव त्तमिह्व सिचेदुन ग्रामनणादिकमर्थ
यमानं यांयं प्रत्युक्तिरियम् सानो नतिं इच्छां नुमिह सिचेह्रस्त्र विधं जनप्रे
क्षिनना प्रे कश्चिदवगमिष्यतीत्येनाद्दरां प्रतिबंधकं किंचिदपि नास्तीति इदयम्
इदमन्ये यप्रश्नस्योत्तरस्योदाहरणम् विवद्धप्रश्नमुत्तरं यथा कुशलं तस्या जीवति
कुशलं पृच्छामि जीवती त्युत्तरम् पुनरपि तदेव कथयामि मतां तु कथयामि याश्व
सितीति ईर्ष्यामानानं नाम नुतमार्यांश्रिकथा: सखीमागतां प्रति कुशलं तस्या
इति नैयकप्रश्नः जीवतीति सख्या उत्तरं जीवंत्या: कुत: कुशलमिति नदमिप्राय:
स्त्रन्यत्यू छमन्य उत्तरमिति नायकस्य पुनः कुशलं पृच्छामीति प्रश्नः एषस्योत्त

हि मादिं न घ शो भावं सुराः शीतं न जानन्ति लक्षितान्युदिते चंद्रे पद्मानि च मुखानि च मी(
लित न्यायेन भेदानध्यवसाये प्राप्ते कुतश्चित्कारणाद्विशेषस्फुरणे तु तद्गुतिह्नही विशेष
कः क्रमेणोदाहरणद्वयम् तद्गुणरीत्यापि भेदानध्यवसायप्राप्तावुन्मीलितं दृश्यते य
था नरापद्मगौ देहा सप्रसरस्सहचरैः स्तावकीनैर्यशोभिर्धावल्यं नीयमाने त्रिजगति परि
तः श्रीनगेंद्रे तीद्दनेय चेषु नाभीकमलपरिमलप्रौढिमामाद्रपिष्य देवानां ना
भविष्यत्कथमपि कमलाकामुकस्याववोधः काकः कृष्णः पिकः कृष्णः को भेदः पिक
काकयोः वसंतकाले संप्राप्ते काकः काकः पिकः पिकः इदं विशेषकस्योदाहरणं
नतम् अत्र द्वितीयकाकपिकशब्दौ काकत्वेन ज्ञातः पिकत्वेन ज्ञात इत्यर्थौ न रसंक्र
मित्र वाच्यौ यथावा वाराणसीवासवतां जनानां साधारणे शंकालोकनेपि पार्षद्
द्वारवृणमुत्तमांगे प्राचीनमीशं प्रकटीकरोति किंचिद्दाकृत इत्यतं स्या दृष्टौ

प

कुं॰
५८

77

राम
५८

घोचवर्णितः दानार्थिनोमधुकरायदिकर्णतालैर्दूरीकृताःकरिवरेणमदांधबुद्ध्या
तस्यैवगंडयुगमंडनहानिरेषा भृंगाःपुनर्विकचपद्मवनेचरंति अत्रभ्रमरेणगमलं
करेणत्वगणेनगजस्यतत्रमतिर्द्वेपोदोषत्वेनवर्णितः आघ्रातंपरिचुंबितंपरि
मुहुर्लीढंपुनश्चर्वितंत्यक्तंवाभुविनीरसेनमनसातत्रव्यथांमाकृथाः हेसद्रत्न
तवैतदेवकुशलंयद्वानरेणादरादंतःसारविलोकनव्यसनिनाचूर्णीकृतंनाश्मना

२ अत्रवानरस्यचापलदोषेणरत्नस्यचूर्णनाभावोगुणत्वेनवर्णितः अत्रप्रथम
चरणयोरुल्लासोऽन्यपदः मध्यमयोः कालिदासेनलाभात्रिकः ताभ्यांतो
यदिनस्यात्तामवरालंकृतिर्मुसा स्वल्पमेवांबुलभंतेप्रस्थंप्राप्यापिसागा
रम मीलतिपदिपद्मानिकाहानिर्नियमतपतेः ताभ्यांगुणदोषाभ्यांतोगुणदो
षो अन्यकस्यचिद्गुणेनान्यस्यगुण लाभेछितीयार्द्धमदाहरणम् दोषेण

79

श्रीमते रा[मानु]जाय नमः वासुदेवं रमाकांतं नत्वा लोगाक्षिभास्क
रः कुरुते जैमिनिनयेप्रवेशायार्थसंग्रहम् ॥ अथ परमकारुणि
को भगवान् जैमिनिः धर्मविवेकाय द्वादशलक्षणीं प्रणिनाय तत्र
आदौ धर्मजिज्ञासां सूत्रयामास अथातो धर्मजिज्ञासेति अत्रा
थशब्दो वेदाध्ययनानंतर्यवचनः अतःशब्दो हि वेदाध्ययनस्य
दृष्टार्थकत्वं ब्रूते स्वाध्यायोऽध्येतव्य इत्यध्ययनविधौ तदध्यय
नस्यार्थज्ञानरूपदृष्टार्थकत्वेन व्याख्यापनात् तथा च वेदाध्यय
नानंतरं यतो अर्थज्ञानरूपदृष्टार्थकं तदध्ययनं अतो हेतोः धर्मस्य वे

४०

राम

वात् एवं ज्ञानलक्षणाया अभावे सुरभिचन्दनमिति ज्ञाने सौरभस्य भानं कथं।
स्यात् यद्यपि सामान्यलक्षणया सौरभस्य ज्ञानं सम्भवति तथापि सौरभत्वस्य भा
नं ज्ञानलक्षणया एवं यत्र धूलीपटले धूमत्वेन ज्ञानं तत्र धूलीपटलस्यानुव्यव
साये भानं ज्ञानलक्षणया योगजो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः युक्तस्य स
र्वदा भानं चिन्तासहकृतोऽपरः योगाभ्यासजनितो धर्मविशेषः श्रुतिपुराणादि
प्रतिपाद्य इत्यर्थः युक्तयुञ्जानरूपयोगिद्वैविध्याद्धर्मस्यापि द्वैविध्यमिति भावः यु
क्तस्य सर्वदाभाने युक्तस्य तावद्योगजधर्मसहायेन मनसाकाशपरमाण्वादि ।
निखिलपदार्थगोचरज्ञानं सर्वदैव भवति द्वितीयस्य चिन्ताविशेषोऽपि सह
कारीति इति श्रीविश्वनाथतर्कपञ्चाननभट्टाचार्यविरचितायां मुक्तावल्यां प्रत्य
क्षखण्डः समाप्तः ॥ [illegible]

णं व्याप्तिधीर्भवेत् अनुम[illegible]र अनुमा नौव्याप्ति[illegible]निक[illegible] पर
मर्शो व्यापारः न पाक्षिपेनवृ[illegible]णामहानसादौ धूमे वह्निव्याप्तिर्गृहीता
पश्चात् स एव पुरुषः क्वचित्पर्वतादौ अनवच्छिन्नमूल[illegible]मरेखाम्
अविलिह्य पश्यति तदनंतरं [illegible] धूमो वह्नि[illegible] व्याप्य इत्येवं रूपं
व्याप्तिस्मरणं तस्य भवति तस्मात् पश्चात् वह्निव्याप्य धूमवानयमिति ज्ञा
नं भवति स एव परामर्श इत्युच्यते तदनंतरं पर्वतोयं वह्निमानिति ज्ञा नि
नं जायते तदेवानुमितिः अत्र प्राचीनास्तु व्याप्यत्वेन ज्ञायमानं धू
मादिकं लिंगमनुमितिकरणमिति वदंति तद्दूषयति ॥ ज्ञायमा
नं लिंगं तु करणं नहि ज्ञायमानलिंगस्यानुमितिकरणत्वे युक्तिमा
ह अनागतादि लिंगेन तस्मादनुमितिस्तदाप्यनुमितो लिंगं कर

82

त्वादिनाशब्दादेरभावस्यासाधनाधिकरणधर्म्यवच्छेदेनतद्वृत्तिकालेम
हाकालेवावृत्तावपिपदागोत्वंतदागोप्येत्रकालत्वंतत्रजन्यद्रव्यं
मलयावृत्तिर्वेत्याद्देनातिप्रसंगः हेतुमतिप्रलयेतत्सामानाधिकर
ण्याभावात्स्वविशिष्टेतिविशेषणात् कापिसंयोगाभावान्मेयत्वा
दित्यादौसंयोगाद्यात्मकस्यसाध्याभावस्यकेवलेत्वाधिकरणवृत्ति
त्वेपिनाव्याप्तिः जलादिवृत्तित्वविशिष्टगोत्वाद्यभावस्याभावस्तु
त्वा जलौघाभावोनतुधूमाभावः जलादावपितदभावप्रसंगात् त्य
पतमानाधिकरणेनासाध्यतावच्छेदकावच्छिन्नव्याप्यतावच्छेदके
क

येनहेतोर्ज्ञानस्य वि[षय]तयाधिकरणे घटादौ वर्तमानस्य साध्याभाव
स्यातस्यात्वेपि न क्षतिः एवं दलांतरेपि संबंधभेद निवंधनो दोषः ए
वं येक विवक्षया निरसनीयः रूपादिसामान्याभाववत्साध्यपृथिवीत्वा
दिकं सद्धेतुरेव प्रलयपरमाणुव्युत्पत्तिकालेचाव्याप्तिरिति चेत्तन्न
च त्वात् न प्रतियोग्यसमानाधिकरण ध्वंस [illegible] प्रागभावयोरत्यंताभावावि
रोधित्वं मानाभावात् अत एवावांतराश्यामे रक्तं रूपं नास्तीति प्रत्य
यः न चैवं परक्षिप्तध्वंसाद्यवगाही पूर्वापरक्षिप्तध्वंसप्रागभावावि व
रक्षितपितस्यापात्ययप्रसंगात् न त्वसामानाधिकरण्यं चकस्यावशिष्ट
हेत्वधिकरणावच्छेदेन वोध्यम् तेन गोत्वजन्यत्वस्यापि प्रलयपाव्याप्ति

सिद्धा

निरुक्तहेतुप्रकारकत्वावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नविधेयतानिरूपितत्वोपादानस्य फलमति
तेनरूपाभावविशिष्टः रूपीयपर्वतो वह्निमान् धूमादित्यादिस्थलीयधूमाभाववत्तेजस्त्वीयपर्वतरूपस्वरूपावच्छेदकतेजस्त्वीपर्वतो वह्निमान्
वह्निव्याप्यधूमवान् पर्वत इत्यनुमितिमादाय व्याप्तिवारणं बोध्यम् ४

85

हे.
५

वच्छिन्नत्वोपादानम् अवच्छेदकत्वं च तत्पर्याप्त्यधिकरणत्वं तेनातो जलत्वोप
जीवो वह्निमानित्यादौ विशिष्टपर्वतत्वादिमत्ति वह्न्यभावरूपबाधस्य कांच(
नमयः पर्वतो वह्निमानित्यादावप्यसिद्धेश्च शुद्धपर्वतत्वावच्छिन्नपक्षका
नुमित्यविरोधित्वेपि न संग्रहः एवमग्रेपि बोध्यम् साध्यतावच्छेदकावच्छिन्न
साध्यप्रकारकत्वानिवेशे पाषाणमयो विशेषितपाबाधस्यातिप्रसक्तेर्व्याप्तिः (
तत्प्रकारकत्वसाध्यतावच्छेदकावच्छिन्नत्वानुपादाने पितृद्रोणत्वादवच्छेदकं वह्निसा
मानाधिकरण्याभावादि निष्ठायस्य धूमजनकतेजस्त्वीवह्निव्याप्यधूमवान्नद्रुदइत्या
द्यनुमितिप्रतिबन्धकत्वान्न पक्षसाध्यपर्वलिङ्गव्याप्तिवारणप्रयोजनकत्वं

वह्निव्याप्यधूमवान् द
इत्यनुमितिमादाय
व्याप्तिः ४

बाधसत्त्वेपि तदयो
रव्याप्तिः ३

पर्वतो वह्निमानवह्निव्याप्यधूमवान्ह्रदश्चेत्यत्र २

उक्तसमूहालंबनानुमितिप्रतिबंधकत्वाभावादापातिप्रसंगवारणाय साध्या।
न्यपदं तत्साध्यतावच्छेदकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबंधक
ताशालिपद्यार्थकत्वान्न विषयत्वपर्यवसितार्थः एवं च साध्यतावच्छेदकावच्छि
न्नप्रकारकानुमितिसामान्यं प्रति पर्वतो वह्निमान्वह्निव्याप्यधूमवांश्चेत्या
द्यनुमितौ ह्रदो न वह्निमानित्यादिनिश्चयस्य विरोधित्वान्नातिप्रसंग इति भावः
बाधसत्प्रतिपक्षस्थलेऽव्याप्त्यादि व्यक्तासिवारणाय पक्षतावच्छेदका।
वच्छिन्नपक्षविशेष्यकत्वस्य निवेशः धूमत्वादिना ह्रदविशेष्यकानुमितौ तत्प्रा।
तिबंधकनिश्चयस्याविरोधित्वात् तद्दोषतादवस्थ्यमतः पक्षतावच्छेदका।

प्रतिहेतुव्यापकसा
ध्याभावह्रदमानादि
करणाप्रतिहेतु
मत्वर्दृः सत्प्रति
पक्षः ३

पर्वतो वह्निमानि
त्यत्र न वह्न्यभा
व विशिष्टो ह्रदे
दोषः ४

ह्रदो वह्निमान्वह्नि
व्याप्यधूमवांश्च

साध्यप्रकारकानुमितौ पक्षविशेष्यतानिरूपितत्वानुपादाने वह्निमान्ह्रदो वह्निव्याप्यधूमवा न् इत्यनुमितौ ह्रदो वह्न्यभाववानिति निश्चयस्याप्रतिबंधकत्वात्तत्र बाधेऽव्याप्तिरतस्तत्पक्षविशेष्यता
निरूपितत्वोपादाने निरुक्तहेतुप्रकारतायां पक्षविशेष्यतानिरूपितत्वानुपा दाने ह्रदो वह्निमान् वह्निव्याप्यधूमवान्घटः इत्यनुमितौ विवक्षितानुमितिसामान्यान्तर्गतायां ह्रदो धूमाभाववानिति निश्चयस्याप्रतिबं
धकत्वात्तत्र स्वरूपासिद्धावव्याप्तिरतस्तत्पक्षविशेष्यतानिरूपितत्वोपादानं पूर्वत्राऽवच्छिन्नत्वोपादानाच्च द्रव्यं वह्निमद्वह्निव्याप्यधूमवान्ह्रदः इत्यनुमितिमादायागतायामव्याप्तिर्बाधे सा निरस्ता उत्तरत्राव
च्छिन्नत्वोपादानाच्च ह्रदो वह्निमान् वह्निव्याप्यधूमवद्द्रव्यं इत्यनुमितिमादाय स्वरूपासिद्धेनाव्याप्तिः ३

वह्निमान्वह्निव्याप्यधूमवान् इत्यनुमितिमादायाव्याप्तिः २

सि. ल.
१.

सामान्यानवच्छेदकत्वादिति विशिष्टे व्याप्तिर्वाच्या प्रमेयत्वसत्वादेः यत्समत्वादना
स्वयातिरिमाह व्याप्यत्वे इति प्रतिदंडमिति भिन्नत्वेवीति परेणान्वयात सामान्यस्यैवेति प
र्यवसितत्वस्य सामान्यवच्छिन्नसामानाधिकरण्यसामान्यस्य चेत्यर्थः केचित्तु कापित व्याप्ता
वप्रयोजकत्वमन्यथा तज्ञावानवच्छेदकत्वहेतुना तदवच्छेदकमेव कुतो नवद्वत्वादेः
साध्यते वद्वत्वावच्छेदेन तत्तत्संयोग व्यक्तीनां समस्तत्वेपि संयोगसामान्यस्य संभवादिति
भिप्रायको यं ग्रंथ इत्याहुः गुणस्येति सामान्याभाव इत्यपरेणान्वयः नन्वाद्यक्षणे घटे
गुणो नास्तीति प्रत्ययदर्शनात् संयोगविसंकर्षाभावात् प्रथमं क्षणे घटादौ गुणो नास्ती त्यादिव्यवहा
रादिकं च संदिग्धाच प्रामाण्यकगतः स्यात्तं तरमाह प्रलयावच्छेदेनेति तदानीजन्यभाव

राम
१.

आदिना द्रव्यभिन्नत्वादेरुपग्रहः अत्र यद्यपि निर्गुणत्वेन त्वोपाधेर्नस्वाभावेन साध्या
भावाव्यापकतया दोषत्वं संयोगस्येव साध्याभावतया दोषत्वं संयोगस्येव साध्याभाव
तया द्रव्यादौ न स्पष्टमित्यत आह नापि व्यभिचारोऽव्यापकतया अत एव तस्यापि त्वव्याप्य
त्वेन साध्यस्य पदावृत्तित्वाभावो व्यापकत्वं बोध्यं संयोगसामान्याभावो न द्रव्यवृत्ति
दि निर्गुणत्वव्याप्यत्वादनुमानेनापि द्रव्यं संयोगसामान्याभाववानित्यनुमितौ प्रतिरो
धादिति ध्येयम् ननु यो यद्धर्म्मस्यानवच्छेदकः स तदभावस्यावच्छेदक इति व्याप्तेर्घट
त्वादेः संयोगसामान्याभावावच्छेदकत्वं सेत्स्यतीत्याशंक्य निराचष्टे न चेति तथ्याच
व्यभिचारान्नोक्तव्याप्तिरिति भावः ननु द्रव्यं संयोगसामान्याभावावच्छेदकं संयोग

टे मिथः परस्परं सखीजनस्य वचः आकर्ण्य सा प्रस्तुतनायिका कमलमुकुलाग्रप
ल्लवव्याजेनैव तां मदीयस्तनापरत्वतवनांतं कथयंतीति आर्द्रचैलस्य वस्त्र
स्यांतेन मांतेन स्तनं नष्टं तिरोदधे बिंबरूपमधरं च पाणिना तिरोदधे आच्छा
दितवतीत्यन्वयः अन्यापदेशेति अन्यस्यापदेशो मिषं पत्रताद्दृशामित्य
यैः तदीयमेव गंधं दर्शयतीति अप्रस्तुतेत्यादि व्यवस्थापितमिति प्रस्तुतत्वे
पि मुख्येन यातात्यर्थाभावादनाप्यामि पापर्यवसानाभावादिति भावः सा
स्येव निमालंकृति ध्वनेः सकाशादन्येवेत्यर्थः प्रस्तुतत्वलिभनेन प्रस्तु
नत्वमाप्या रात्रिरिति हे विलोचने शिवा कल्याणरूपा कानिर्वचनी
वा यं नमोरात्रिः शिवरात्रिरित्यर्थः सन्निधत्ते सन्निहिता भवति अतः यु ना
वां अप्रमत्ते जागरं कृतं तत्राह युवयोः समीपे चिरेण समानधर्मैः स

सम
ते

वेश्यायामिति च विषयसप्तमी न द्विवपद स्त्वर्थः विटानां सर्वस्वाय
हृदयेशः संकल्पस्तेन दुःप्राप्येति । वेश्याविशेषणं अन्येति हि मं
गान्धाहरूपमां दृष्ट्वा हृष्टमनसां पुष्पाणां लता एतावधावन्न
वमालिकायाः कालिकासंज्ञा तरजस्का भवति लोलामितिक्रिया
विशेषणं वा नवमालिकायाल्लता विशेषस्य वालामपि नवाग्र
ज्ञातरजस्कां कालिकामकाले व्यर्थं किमिति कदर्थयसि पीड्य
सीत्यन्वयः रजः पुष्परजः स्त्रीणां रजश्च स्पृष्ट एव तीति एतद्व
नं स्पृष्ट एव तिसतीत्यर्थः कोशाति इयं नलिनीकोशाद्बहु मुकुल
पुमाले कादंबस्य हंसस्य चं बुद्धतं धत्ते दधाति तद्येयं चूतस्य लता
नूतनं पल्लवं कोकिलेऽस्य वितं पते [illegible] दीपिकायावाप्यात्त

90

८१

वाच्यासिअंगत्वेनतेनापिअंगं विवक्षितं प्रधानभूतं वासुदेवत्वमादा
येवतत्कथंनोचितमात राकुत्री कुचनैकत्वकारणेहरयेनम इत्यत्र
राहुशिरश्छेदकारित्वमेव विवक्षितं अंगमितिप्रुतं तदा तपपर्य्या
योक्तमिति भावनीयं लोकमिति यस्यादिपादस्यांघ्रिः लोकंपश्यप
ति अयचस लोकः यस्यपतं जलेः शेषावतारस्यांघ्रिं न पश्यति
उरगत्वात् ताभ्यामादिपादयतं जलिभ्यामपरिच्छेद्यं अनाकलनी
या निवेघतामिति नलंप्रति दमयंत्या उक्तिः तवाल्पदयंमनः
कान्ते शिरीषकलीका मदुत्वाभिमानं सम्यक्पंतोपादोकिंप
दूरपर्य्यंतं प्रयासेनिधातुमिछु निहंत खेदे एतं निवेघतां देव
मिति देवतासार्वभौमं सकलदेवाधीश्वरं देवं वंदे कीदृशंजांघि

९१

ल राम

प्र
म

~~मवानुकाकर्ष्टिरं इलांदीपरूपतांपत्तेः एवंकारनलेबासरूपेणासितंगतेलंगाप्राप्यः~~
~~पिंदग्रतीतनलवत्ससंलीयते~~ अप्रस्तुतांकुरः पर्यायोक्तमिति वचःप्रतिपा
दनंभंग्यंतराश्रयोभंग्यंतरप्रकारकं लब्दोणंपरित्कुरुते पर्हेवेति तथाचवि
वक्षितस्वप्रकारातिरिक्तेन चान्तरेण रूपेण व्यंग्यस्याभिधानं पर्यायोक्त
मिति लक्षणं पर्यायेणभंग्यंतरेणोक्तमभिहितं व्यंग्यं यत्रेति व्युत्पत्तेः लक्ष

वो

णेस्वपदं व्यंग्यपरं नच व्यंग्यस्यैव वाच्यत्वेनिष्कलेविरुद्धं चेति वाच्यं प्रका
रभेदात्तदुक्तमम्मटभट्टैः यदेवो व्यतेतदेव व्यंग्यं यथा तु व्यंग्यं न तथोच्य

त

ते इति चाहरणे तिविशेषणात् नमोराहुशिरश्छेदकारिणे दुःखहारिणे
इत्यत्र न पर्यायोक्तम् प्रसंगः स्वासाधारणरूपेण वासुदेवत्वे पतु राहुशिरश्छे
दकारित्वरूपव्यंग्यमात्रपेव पर्यायोक्तं वक्तुमर्हे ननु विशेषणसाम
र्थ्यलभ्यं वासुदेवत्वमादायैवेति तदयुक्तं राहुशिरश्छेदकारित्वस्य

अनुमितिनिष्ठकार्यतासाक्षात्कारजनकग्रहविषयत्वेन २

तद्रूपमाह अनुमितिनिष्ठकार्य्यतानिरूपकसंबंधित्वेनेति अनुमिति
पदस्य प्रकृतपक्षतावच्छेदकविशिष्टे प्रकृतसाध्यतावच्छेदकावच्छिन्नप्रका
रकपक्षतहेतुतावच्छेदकावच्छिन्नहेतुकानुमितिपरत्वं स्वरूपमेव सर्व्वविष
ति अतो न जल्पमात्रप्रसंगः निरूपकत्वं चात्र प्रतियोगित्वं पदितरा कार्य्य
स्य कार्य्यताप्रतियोगित्वाभावात् अनुमित्यसंग्रहः अतः संबंधिपदं संबंधप
द्वयपरामर्शोऽस्य तत्साक्षात्काराजनकसाक्षात्कारविषयत्वात्मकनिरूपक
त्वस्य लाभाय अत्र च पर्वतो वह्निमान् धूमवत्त्वादिति समूहालंबनानुमिति
विषयेऽपि हृदनिष्ठवह्न्यभावादिरूपबाधे पर्वतादौ धूमादिना वह्न्यादिस्थापनेऽदोष
ताप्रसंगः प्रकृतानुमितिनिष्ठकार्य्यतानिरूपकसंबंधि ग्रहत्वस्य कस्या

प्र म

एए

अनुमितिनिष्ठका र्यता ४

93

हे· ५

ष्टप्रतिबध्यतानवच्छेदकतया तदवच्छिन्नप्रतिबध्यतानि[illegible]तानिरूपक।
निवेशासंभवात् तथाविधगुरुत्वव्यापकप्रतिबध्यतानिवेशे च [illegible]मित्यपि ते
पि नित्यमित्वाद्येऽपि परामर्शविरोधिनिवाद्यादेर्व्याप्तिः उभयविरोधिनि
पक्षतासिध्यादावेवतादृशप्रतिबध्यतानिरूपकज्ञानविषयत्वसत्त्वात् अ(
तः कल्पान्तरमाह साध्यव्याप्येति प्रकृतपक्षतावच्छेदकविशिष्टपक्षे प्रक
तसाध्यतावच्छेदकावच्छिन्नतत्साध्यस्ति विशिष्टप्रकृतहेतुतावच्छेदकावच्छिन्न
प्रकारकज्ञानमिति साधारण्यपरिमित्यर्थः एवं चतादृशसमूहालंबनानुमितेः
व्याप्त्यादिविषयकतया व्यभिचारज्ञानादिप्रतिबध्यत्वेन तत्र व्यभिचारा।

शे क

95

ते[illegible]लंकाराणाम् : [illegible] इति दावत्तत्तदसुंदरत्वोज्ञा
वोनमवि[illegible]रमेव अलंकारसर्वस्वकारग्रंथविरोधोज्ञावनमाकिंचित्कर
मेवप्रति[illegible]विशेषइति परोत्कर्षासहिष्णुत्वमात्रमुज्ञावयितुरवगमयतीत्यवि
स्तरेण प्रपर्यायोक्तं लक्षयति पर्यायोक्तमिति रमणीयेनव्याजेन स्वस्वप
रस्यवेष्टस्यसंपादनं [illegible] : संपादनं तदपिपर्यायोक्तं पर्या
येणव्याजकरूपेणोक्तं यत्रेतिव्युत्पत्तेः संपादनेति संपादनरूपंपदिष्टं त
त्साधनं तत्करणमित्यर्थः देहीति परिधानेनाधरवस्त्रेण निगृहीतमा
च्छादितमित्यर्थः एवंचप्रकारद्वयसाधारणं तदन्यतरत्वंसामान्यलक्षणं
बोध्यम् पर्यायोक्तं उदाहरति अत्रनिंदास्तुतिभ्यामिति स्तुतिनिंदयोरिति
चेतरेतरयोगोन विवक्षितः तयाचनिंदयास्तुतेः स्तुत्या च निंदायाः
स्तुतेश्चाभिव्यक्तिरभिव्यक्तिर्व्याजस्तुतिरित्यर्थः प्रपत्तेव्याजेन स्तुतिरि

चस्तयोर्व्याजरूपास्तुतिरिति च व्युत्पत्तेः अत एव व्याजस्तुतिपर्यायेनगणना
भान्निंदया निंदापि व्यक्तिर्व्याजनिंदा एवम्प्रकारपस्तुतिनिंदयोः
समानविषयत्वभिन्नविषयत्वाभ्यांप्रत्येकं द्वैविध्यमिति चत्वारो
भेदाः अन्यस्तुतिभिन्नविषयस्तुतिक एक एवेति पंच भेदाः तदेत
एतं न व्याजनिंदाभिन्नत्वे सति स्तुतिनिंदान्यतरत्वं सर्वानुगतं बोध्यं
कस्ते इति निंदपं प्रतिकवेलक्षिः त्वापि यो कुपे कं स ज्ञिमन्नेव मास्थि
ति आद्ये सति पारिपंथिनः शत्रवः सप्त स्वसमाकृष्टा भवेत्पन्न
पः सप्तसप्तयो यथा अस्येति रूपः सप्त चयो सप्त यो ऽयम् तत्समा
कृष्टा इति द्वितीयार्थो निंदायोतकः त्वया संभृतो ऽस्त्ताः रूपं विवेधि
त्वादिवस्तुपगता इति स्तुतौ पर्यवसानं अर्द्धं मिति विवस्पदे सांसद
दानव दैत्यारिणा हरिणा स्तनं हरिहरात्मकस्यैकस्य विग्रहस्य प्रसि

रा

५

इति व्यो पूर्वं तत्तद्विशिष्टवन्ह्यभावा
भावादेरपि १

९७

५

प्रमेयत्वसामान्या
भावस्य २

शिष्टस्याभावादेरपि वन्ह्याद्यभावप्रतियोगित्वादिति तत्तत्प्रतियोगितात्वेन समनैयत्यं
दण्डिपमितिकपमुक्ताभावस्य लक्षणघटकतेति वाच्यं समनैयत्यशरीरे व्यापकता
घटितदभावप्रतियोगितात्वावच्छिन्नीयाव्याप्यवृत्तिया स्वविशेषरूपावच्छिन्नतायाश्च निवे
शनेनानुपपत्त्यभावात् ननु साध्यनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वरू
प व्यापकताघटितसमनैयत्यशरीरे निवेशयते व्यधिकरणधर्मावच्छिन्न[illegible]योर्भाव
भावव्यतिप्रतियोगित्वयोर्द्वयोरेव प्रत्येकं प्रमेयनिष्ठान्योन्याभावप्रतियोगितानव
च्छेदकत्वपानोक्ताभावस्य साध्यतावच्छेदकसमनियतप्रतियोगिताकत्वमित्य
तोऽभावान्तरमाह वन्हित्वेनेति प्रमेयमात्रस्याभावइत्यग्रतनेनान्वयः वन्हित्वे
न प्रमेयं नास्तीति प्रतीत्या प्रमेयसामान्य एव वन्हित्वावच्छिन्न[illegible]प्रतियोगिताकाभा
हनात् प्रमेयत्वव्यापिके च तादृशाभावीयवन्हित्वावच्छिन्नप्रतियोगितेति भावः यद्यपि तत्र

राम

५

रसः सूचितः ननु वाच्यत्वादिसाध्यकस्थले समवायित्वरूपव्याधिकरणधर्मावच्छिन्नसा
ध्याभावप्रसिद्धेः संभवेपि प्रमेयत्वादिना प्रमेयसाध्यकस्थले साध्याभावाप्रसिद्धेरेव
प्रमेयसामान्याद्वृत्तिधर्मस्याप्रसिद्ध्या व्याधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यापि तस्या
संभवादित्यत आह प्रमेयसाध्यके चेति भावत्वेनेति अभावानां भावानामित्युभयत्रैवा
भाव इत्यग्रिमस्य संबंधः अभावत्वभावत्वाभ्यां भावाभावयोरभावो समनियततयागमि
न्नावित्तितत्प्रतियोगितात्वेन प्रमेयत्वादिसमनैयत्याभित्वेन तादृशाभावोपि कूटघटनपा
परिष्कारेणापि साध्याभाववदवृत्तित्वरूपप्रथमलक्षणघटकीभविष्यतीत्यभिप्रायः न
पदभावीयप्रतियोगितात्वेन साध्यतावच्छेदकसमनैयत्याभिति विवक्षणे वाच्यत्वादिसा
केवलान्वयिसाध्यके च तादृशाभावाप्रसिद्धिः निखिलव्याधिकरणधर्मावच्छिन्नाभावानां
समनियतत्वेनाभिमततया घटादेरपि तथाविधवाच्यत्वाभावप्रतियोगित्वात्तुरि

श्रीमते रामानुजाय नमः स्वौजसमौडित्यादिना तावत्स्वादयो ह्याप्प्रातिपदिकाद्विहितास्तेषामर्थविशेषे व्यवस्थापद
ते र्शयितुमारभते प्रातिपदिकेत्यादिना प्रथमादयः संज्ञिताः प्राचां संज्ञास्ताभिरिह व्यवहार इति स्वौजसमौडिति
सूत्रे मूलकृतोक्तं कौस्तुभे तु प्रथमादयः शब्दाः सुपां त्रिकेषु वर्तन्ते समंस्यादस्मत्तत्त्वादितिन्यायादित्युक्तम्
तथा च न्यायसिद्धत्वादस्मिन्सूत्रे प्रथमादिसंज्ञानामकरणेपि न क्षतिरिति ज्ञेयम् यद्यपि पंचकं प्रातिका
र्थ इति गृह्यते ततो लिंगवचनग्रहणमनर्थकं प्रातिपदिकार्थ इत्येव सिद्धे मात्रग्रहणं च कर्मादिव्यवच्छेदा
न स्यात् प्रातिपदिकार्थादनतिरिक्तत्वात् त्रिकपक्षेपि लिंगग्रहणमनर्थकमेवेत्याशंक्य विवक्षितं दर्शय
ति नियतोपस्थितिक इति यस्मिन्प्रातिपदिके उच्चारिते यस्यार्थस्य नियमेनोपस्थितिः स प्रातिपदिकार्थः
शाक इति यावत् नन्वेवं सिंहो माणवक इत्यादौ प्रथमा न स्यात् अत्राहुः शाकार्थमादाय विभक्तेरुत्पत्तौ स
त्यां पश्चात्तदन्तरसमभिव्याहारेण स्वार्थबोधेपि क्षत्यभावात् इति मात्रशब्दस्येति तस्यावधारणमर्थः
मात्रं कार्त्स्न्येवधारणे इत्यमरः प्रातिपदिकार्थलिंगपरीमाणवचनान्येव प्राति प्रातिपदिकार्थलिंगपरीमाणव

३८

पूर्वमनुपस्थितत्वात्

चनमात्रमित्येवकारेणास्वपदविग्रहः मयूरव्यंसकादित्वात्समासः प्रत्येकमिति द्वंद्वांते श्रूयमाणत्वादि
तिभावः ननुवीरपुरुषइत्यादाववभेदसंसर्गस्याधिकस्याभानात् नचपूर्वापरेत्यादिनावीरशब्दस्यसमाससवि
धानंप्रथमोत्पन्नोलिंगमितिवाच्यम् द्वितीयाद्यंतानामपिवीरंपुरुषमानयेत्यादौतद्विधानस्याचरितार्थ
त्वादितिचेन्न संसर्गस्यवाक्यार्थत्वेनवहिरंगत्वप्रथमप्रवृत्तिसंस्कारवाधानुपपत्तेः पदसंस्कारपक्षस्यै
वेहाभ्युपगमात् मात्रपदेनकर्माद्याधिक्येप्रथमानैवेदपिलिंगपरिमाणग्रहणाल्लिंगाधिक्येचभवेदे
वेत्याह लिंगमात्राद्याधिक्यइति यद्यपिलिंगमात्रेइत्येवात्रार्थस्तथापिप्रातिपदिकार्थं विनालिंगादिप्र
तीतेरसंभवादाधिक्येइत्युक्तम् उच्चैरिति पदत्वादिरुत्वविसर्गौभवतः किंचास्यप्रथमांतत्वात् ग्राममभुद्वे
स्तवल्स्वंग्रामममुच्चैस्त्वमितितिसपूर्वायाइतिसूत्रेणतेमयादेशयोर्विकल्पसिद्धिरपिफलम् कृष्णइति
यद्यपिनीलद्रव्येऽनियतलिंगस्तथापिवासुदेवेभगवतिनियतपुंलिंगएवेतिभावः ज्ञानमितिभावे
प्र ल्युट् तल्लटीतिद्विकपक्षेऽनियतलिंगंनैकस्यार्थत्रिकपक्षेतु यद्यपिप्रकृत्यर्थस्तथापितत्तल्लिंग

पं० १ · त्वात · म · ह · प्र · 100 · एम १

अयं

दृष्टव्यः वैधर्म्येणापि दृश्यते कृतं च गर्वाभिमुखं मनस्त्वया किमन्यदेवं निहताश्च नो द्विषः तमां
सि तिष्ठति हि नावदंशुमान्न यावदायाति सुदयाद्रिमौलिताम् वाक्यार्थयोः सदृशयोरैक्यारो
पो निदर्शना यद्दातुः सौम्यता सेयं पूर्णेन्दोरकलंकिता अत्र दातृपुरुषसौम्यत्वस्योपमे
यवाक्यार्थस्य पूर्णेन्दोरकलंकत्वस्योपमानवाक्यार्थस्य यत्तद्भ्यामैक्यारोपः यथा वा अ
रण्यरुदितं कृतं शवशरीरमुद्वर्तितं स्थलेऽब्जमवरोपितं सुचिरमूषरे वर्षितं श्वपुच्छम
वनामितं बधिरकर्णजापः कृतो धृतोऽन्धमुखदर्पणो यदबुधो जनः सेवितः अत्राबु
धजनसेवायाः अरण्यरुदितादीनां च यत्तद्भ्यामैक्यारोपः पदार्थवृत्तिमप्येके वदंत्यन्यां नि
दर्शनाम् त्वन्नेत्रयुगलं धत्ते लीलां नीलांबुजन्मनोः अत्र नेत्रयुगले नीलांबुजगतलीला
पदार्थारोपो निदर्शना यथा वा वियोगे गौडनारीणां यो गंडतलपांडिमा अदृश्यत स खर्जूरी
मंजरीगर्भरेणुषु पूर्वस्मिन्नुदाहरणे उपमेये उपमानधर्मारोपः इह तूपमाने उपमेयधर्मा
रोप इति भेदः उभयत्राप्यन्यधर्मस्यान्यत्रासंभवेन तत्समानधर्माक्षेपादौपम्यपर्यवसानं

यो विद्वानेव हि जानाति विद्वज्जनपरिश्रमं न हि वंध्या विजानाति गुर्वीं प्रसववेदनाम् यदि संति गुणाः पुं-
सां विकसंत्येव ते स्वयं न हि कस्तूरिकामोदः शपथेन विभाव्यते चेद्विंबप्रतिविंबत्वं दृष्टांतस्त-
दलंकृतिः त्वमेव कीर्तिमान् राजन् विधुरेव हि कांतिमान् यत्रोपमानोपमेयवाक्ययोर्भि-
न्नोऽप्येक धर्मो विंबप्रतिविंबभावेन निर्दिष्टो तत्र दृष्टांतः त्वमेव कीर्तिमानित्यत्र । कीर्तिकांत्योः
विंबप्रतिविंबभावः यथा वा कामं नृपाः संति सहस्रशोऽन्ये राजन्वतीमाहुरनेन भूमिम्
नक्षत्रताराग्रहसंकुलापि ज्योतिष्मती चंद्रमसैव रात्रिः यथा वा देवीं वाचमुपासते हि ब-
हवः सारं तु सारस्वतं जानीते नितरामसौ गुरुकुलक्लिष्टो मुरारिः कविः अब्धिर्लंघित ए-
व वानरभटैः किं त्वस्य गंभीरतामापातालनिमग्नपीवरतनुर्जानाति मंथाचलः नन्वत्रोप-
मानोपमेयवाक्ययोर्भिन्नमेक एव धर्म इति प्रतिवस्तूपमायुक्तामेवं न अचेतने मंथाच-
ले ज्ञानस्य बाधितत्वेन तत्र जानातीत्यत्र सागराधस्तलावधिपर्यंतसंस्पर्शमात्रस्य विव-
क्षितत्वात् अत्रोदाहरणे पदावृत्तिदीपकाच्छिद्रोऽपि पूर्ववत्प्रस्तुताप्रस्तुतविषयत्वकृतः ।

ङ्क्तविशेषणं तद्दुर्लभमिति तिमं तथ्यं पुरीमवस्कंद लुनीहि नंदनमिति माघश्लोकस्य पूर्वार्द्धं अवस्कंदनं नंदनलवनादि
रूपात्र स्वार्थक्रियेत्यर्थे इति समुच्चये तन्नपातस्येति तत्रेमूलेपष्टीभविष्यमाणत्वात् एवं पचति भवतीत्य
स्य पचिक्रियाभवतीत्यर्थो भासमाने वोध्य इति दिक् अभिहितेत्वेति नन्वेवं पक्वमोदनं भुंक्ते इत्यत्राविहिती
यानस्यादिति चेन्नैवम् इहहि पचिभुजिनिरूपिते द्वे कर्मत्वशक्ती तत्र प्रधानीभूतभुजिक्रियानिरूपितां अन
भिहितां शक्तिमादाय द्वितीयोत्पत्तेः अत एव आसने आले इत्यत्र सप्तमी संगच्छते लुटाधिकरणस्यानोक्तत्वे
पि तिङोपस्थाप्यक्रियानिरूपिताधिकरणत्वस्यानुक्तत्वात् शतमिति शतान्युत्पतावशते इति यत् प्रास
नंद इति इहात्यर्थो कर्मकेति कः आनंदकर्तृक प्राप्ति कर्मीभूत इत्यर्थः यदुक्तम् प्राप्येतेति तस्य फल
माह कश्चिन्निपातेनेति विषयत्व इति संवर्धं इत्यत्र चेन्नुमित्यत्र वाच्यं छिद्यत्वस्त्रमिति गम्यत इति शेषं
युज्यत इत्यर्थः इति एतेन निपातानां द्योतकत्वमेव नाख्यातीति ध्वनितं तथाप्युक्तम् तथेत्युक्ते तथेत्युक्तेक
चेप्युक्तमिति जिज्ञासायामाह ईप्सिततममवदिति स्नेनेच शब्दोपि शब्दार्थवर्ते इति ध्वनयन्नाह अ
नीप्सितमपीति ईप्सितादस्यमनीप्सितमिति पर्युदासोयमिति नञ्चरुपेस्यम् पचं द्रष्टं तद्रूपमपि इहलभ्य
ते इत्याशयेनाय उदाहरति ग्रामं गच्छन् तृणमिति तथाप्युच्यमानस्य गां दोग्धीत्यत्र तस्य क्रियायोगस्ते

ला
५

ष्ठप्रीत्यनुकूल एकदेवदत्तादिनिष्ठो वर्तमानो व्यापार इति निष्कृष्टोऽर्थः। हरिः सेव्यते इत्यत्राप्येवमेव। क्रिया-
प्रधानमाख्यातमिति सिद्धान्तात् धातूपस्थितायाः क्रियायाः तिङर्थं प्रति विशेष्यत्वान्न तु कृदन्तं प्रत्येव विशेषणतेति
निष्कृतस्यार्थः। अतः पाचको व्रजतीतिवत् पचति व्रजतीति नैव वाक्यं पाककर्तृकं गमनं हि पाचको
व्रजतीत्यस्यार्थः। एककर्तृका पचिक्रिया एककर्तृकाकमितिक्रियेति पचिव्रजत्योः। पृथगेवार्थः। ए-
वं च प्रथमान्तविशेष्यको बोध इति नैयायिकोक्तदोषाभावाद्यनुसारिभिर्नादर्तव्यः। तन्मते हि पाककर्ता व्रजना-
नुकूलकृतिमानिति पाचको व्रजतीत्यस्यार्थः। पचति व्रजत्योस्तु पाकानुकूलाकृति व्रजतीत्यर्थः। इत्येवं
रूपेण वाक्यार्थपर्यवसानात्तस्य च भाष्यादिग्रन्थविरोधात्। किं च हरिं भजति देवदत्तः। हरिः सेव्यते देवद-
त्तेनेत्यत्र एकरूप एव शाब्दबोध इत्यनुभवम्। नैयायिकानां तु मते मिथः एव हरीति षष्ठी प्रीत्यनुकूलकृत्याश्रयो दे-
वदत्तः। देवदत्तनिष्ठकृतिजन्यप्रीत्याश्रयो हरिरित्युभयत्र भेदेन वाक्यार्थपर्यवसानात्। तस्मात्प्रथमान्त-
विशेष्यकबोधो भाष्याद्यनुसारिभिर्नादर्तव्यः। यास्कोऽप्याह भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानी-
ति। पूर्वपक्षेणोपात्तत्वात् वार्तिकेतु मतान्तरं गमनं टिप्पि क्रियायां कर्मप्रधानं तु इति क्रियैव उक्तं च भुवं तं हि यास्काने-
कं तिङन्तस्य विशेषणत्वं तथापि तिङन्तमप्याहु तिङन्तस्य विशेषणमिति नच लौकिकप्रयोगेषु तिङन्तस्य वि-

र्थके अत्तियाया अनावश्यकत्वात् प्रथमायाश्चाल्पेवावकाश इति तर्हि उभयोः सावकाशत्वे परत्वात्प्र
थमैव स्यात् तथानभिहिताधिकारो व्यर्थ एवेति चेत् अत्राहुः संख्या विभक्त्यर्थ इति पक्षे सूत्रारंभ आवश्य
ला कः तथाहि सूत्रारंभे कर्मणि द्वितीयैस्यानभिहिते कर्मणि यदेकत्वं तत्र द्वितीयैकवचनमित्यर्थः सूत्राना
रंभे च कर्मणि यदेकत्वं तत्र द्वितीयैकवचनमिति हि वाक्यार्थः तथा सति कुतः कट इत्यादावुक्तेन कर्म
मात्रोक्तावपि तदेकत्वस्यानुक्ततयाऽमदुर्वारः स्यात् न च परत्वात्प्रथमैव स्यादिति वाच्यम् कर्तव्यः कट
इत्यादौ ततोपि परत्वेन कृद्योगलक्षणषष्ठीप्रसंगात् कारकं विभक्त्यर्थ इति पक्षे तु कारकस्योक्तप्रथमादि
